नामधोगतिरिति" काद०। अधोऽधस्तात् गतिर्यस्य ब० । नरकगामिनि त्रि० "अनपेक्षितमर्यादं नास्तिकं विप्रलुम्पकम् अरक्षितारमत्तारं नृपं विद्यादधोगतिमिति" मनुः ८,३९, ४१, अधोगतिं नरकगामिनमिति कुल्लूकभट्टः ।

**अधोगामिन्** त्रि० अधरस्मिन् अधः गच्छति गम–णिनि । नरकगामिनि,अधोभागे–गन्तरि च । स्त्रियां ङीप् ।

**अधोघण्टा** स्त्री अधरात् अधस्तादारभ्य घण्टेव तदाकारफलवत्त्वात् । अपामार्गे रत्नमाला ।

**अधोजानु** न० अधरं जानुनः प्रथमार्थे अस्त्रि । जानुनोऽधरे ब्राह्मणादीनां प्रमाणविशेषमभिधाय "सर्वेषां वाधोजानु इति का० २१,४,१८, "वा विल्वार्थे सर्वेषां जानुनोरधस्तात् अधोजान्विति" तद्व्याख्या ।

**अधोजिह्विका** स्त्री अल्पा जिह्वा जिह्विका अल्पार्थे कन् अधोऽधरा जिह्विका कर्म्म० । (आलजिभ) इति ख्यातायाम् तालुस्थजिह्विकायाम् ।

**अधोदारु** न० अधरं दारु अधर+प्रथमार्थे अस्त्रि । काष्ठमयद्वारस्याधरकाष्ठे (गोवराट्) ।

**अधोदिश्** स्त्री अधरा दिश् अधर+प्रथमार्थे अस्त्रि कर्म्म० । दक्षिणस्यां दिशि । अस्या अधरत्वञ्चोदक्शब्दे वच्यते ।

**अधोदृष्टि** त्रि० अधरस्मिन् अधः दृष्टिरस्य । योगाभ्याससमये नासिकाग्रमात्रदर्शनयुक्ते, तत्प्रकारस्तु "किञ्चित् प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः । नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्षीकृतघ्राणमधोमयूखैरिति" कुमारे "करणान्यवहिष्कृत्य स्थाणुवन्निश्चलात्मकः । आत्मानं हृदये ध्यायेन्नासाग्रन्यस्तलोचन" इति योगसारे "गीतायामपि "सम्पश्यन् नासिकाग्रं स्वमित्यादिना" दर्शितः । अधोदर्शनयुक्तमात्रे त्रि० । "अधोदृष्टिर्नैष्कृतिक" इति मनुः ४,१९६ । कर्म्म० । अधस्थदृष्टौ स्त्री ।

**अधोऽधस्** अधस्+अधस्तात् सामीप्ये द्वित्वम् । समीपाधोदेशे "नवानधोधोबृहतः पयोधरानिति" माघः ।

**अधोपहास** पु० अधः अधोभागस्य स्मरमन्दिरस्य उपहासः सन्धिस्फुरणम् । स्त्रीणामधोभागस्योपहसने । "यएवं विद्वानधोपहासं चरत्यासां, स्त्रीणां सुकृतं वृङ्क्ते" इति वृ०उप० । वृङ्क्ते आवर्ज्जयतीति भाष्यम्।

**अधोभक्त** न० अधरं भक्तं यस्मात् अधर+प्रथमार्थे अस्त्रि ५त० । भक्तभोजनान्ते पीयमानजले ।

**अधोभाग** अधरोभागः अधर+प्रथमार्थे अस्त्रि कर्म्म० । अधरभागे "पूर्व्वभागो गुरुः पुंसामधोभागस्तु योषितामिति" ।

**अधोभुवन** न० अधरमधः भुवनम् लोकः । सप्तसु पातालेषु । तत्स्थानञ्च "भूमेरर्द्धं चारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये चारक्षीराद्यम्बुधीनां निवेशः ॥ लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतममृततरश्मिः श्रीश्च यस्मादभूव । महितचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र ॥ दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः । स्वादूदकान्तर्वडवानलोऽसौ पातालखोकाः पृथिवीपुटानीति सि०शि० ॥ अधिकं भूगोलशब्दे वच्यते ।

**अधोमुख** त्रि० अधो मुखं यस्य ब० । ज्योतिषशास्त्रे प्रसिद्धेषु नक्षत्रभेदेषु । यथा "मूलाश्लेषा कृत्तिका च विशाखा भरणी तथा । मघा पूर्व्वात्रयं चैव अधोमुखगणः स्मृत" इति । गोजिह्वाख्यवृक्षे (अनन्तमूल) अवाङ्मुखे स्त्रियां वा ङीष् । "स्तम्बदृष्टिरधोमुख" इति "अधोमुखैरूर्द्धमुखैश्च पत्रिभिः" इति रघुः । मुद्राभेदे च तत्स्वरूपं मुद्राशब्दे वच्यते ।

**अधोराम** पु० अधोभागे अधस्ताद्भागे रामः शुक्लः इष्टितर्पकत्वात् तस्य रामत्वम् । अधोभागे शुक्लवर्णे "आश्विनावधोरामाविति" य०२४,१,"अधोरामौ अधोभागे शुक्लवर्णावजाविति" वेददीपः । [अधोभुवनशब्दे विवरणम् ।

**अधोलोक** पु० अधोऽधरो लोकः कर्म्म० । भूमेरधःस्थपाताले ।

**अधोवर्चस्** त्रि० अधोगामि वर्चः ज्योतिर्यस्य । अवाचीनज्योतिष्के "तत्ते विद्वान् वरुण ! प्रब्रवीम्यधोवर्चस" इति वेदः ।

**अधोवायु** पु० अधोगामी वायुः शा०त० । अपानवायौ पर्द्दशब्दकारके वाते "अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे" इत्युपक्रम्य "कर्म्म कुर्व्वन्नुपस्पृशे"दित्युक्तं स्मृतौ ।

**अध्यक्ष** त्रि०अधिगतोऽक्षं व्यवहारम् अत्या०स० । नृपस्य बलधारणादिव्यवहारेष्वधिकृते । अध्यक्ष्णोति व्याप्नोति अधि+अक्ष–अच् । व्यापके । अधिगतं मूलतया अक्षमिन्द्रियम् अत्या०स० । प्रत्यक्षज्ञाने । अर्श आदित्वात् अचि । तद्विषये त्रि० । "द्रव्याध्यक्षे त्वचोयोगो मनसा ज्ञानकारणमिति" भाषा० । "सेनापतिबलाध्यक्षाविति" मनुः । अधिष्ठातरि सन्निधिमात्रेण नियन्तरि च "मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति" गीता "यदध्यक्षेण जगता वयमारोपितास्त्वयेति" कुमा० क्षीरिकावृक्षे पु० शब्दार्णवः ।

**अध्यक्षर** अव्य० अक्षरे-विभ० अव्ययी० । अक्षरमधिकृत्येत्यर्थे ।

**अध्यग्नि** अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्ये-